**अन्वितानुपयुक्तवचन** (anvitānupayukta-vacana) *n.* statement of what is semantically related and useless अन्वितानुपयुक्तवचने ह्यर्थान्तरावकाशः NyāyPari. 284.16.

**अन्वितानुभव** (anvitānubhava) *m.* cognition of semantically related (meanings) पदजन्यादन्वितानुभव इति प्रथमपक्ष एव युक्तः LaCandr. 669.8.

**अन्वितान्तर्गतस्वरूपमात्र** (anvitāntargata-svarūpamātra) *n.* mere nature (of word-meaning) included in the semantically related (meanings) स्मृतपदार्थमात्रेण ह्यन्विताभिधानम्; अन्वितान्तर्गतस्वरूपमात्रमपि स्मृत्यर्हम्; न्यायावधृतवचनव्यक्तिकं ह्यन्वितमभिधेयम् NayaVi. 267.3 (*on* i.1.25)

**अन्विताप्रतिषेध** (anvitāpratiṣedha) *m.* non-prohibition of what is connected with (main rite) क्रियामाश्वरथ्योऽन्विताप्रतिषेधात् (मन्यते) ĀśvaŚS. I.v.13.10.

**अन्विताभावबोध** (anvitābhāva-bodha) *m.* cognition of semantically related absence अन्विताभावबोधमपेक्ष्याभावप्रकारकबोधस्यैव नञ्पदज्ञानकार्यतावच्छेदकत्वात् AlaṅkāKau. (Vi.) 51.1.

**अन्विताभावादि** (anvitābhāvādi) *adj.* semantically related absence etc. निर्विशेषादिसमासस्थले निरादिपदस्यान्विताभावादिशाब्दधीत्वावच्छिन्नशक्तिमत्त्वमन्विताभिधायकत्वम् LaCandr. 785.14.

**अन्विताभास** (anvitābhāsa) *n.* knowledge of continuous meanings (i.e. actions) करोतीत्यन्विताभासप्रत्ययविषयतया अनुवृत्तात्मा ... भावनापदार्थ इति तदसत् BhāvanāVi. 41.2.

**अन्विताभिधा** (anvitābhidhā) *f.* denotation (of word) in semantically related (meanings) संबन्धिना न सर्वेण सहसैवान्विताभिधा PrakaPañ. 493.5; सामान्येनान्विताभिधा व्यर्था NayaVi. 265.2 (*on* i.1.25); असिद्धेर्बोधकत्वस्य न चैवं ह्यन्विताभिधा NyāyKu. 3.13.

**अन्विताभिधान** (anvitābhidhāna) *n.* denotation or reference (of word) to the semantically related meanings, doctrine of the Prābhākaras as opposed to the doctrine of the Bhāṭṭas, viz. the denotation or reference (of word) to the meanings which are to be semantically related पदेभ्योऽन्यदितिगम्यते। 'नन्वर्थापत्तिः' इत्यनेनेदमुक्तम्। 'तत्र, अर्थस्य तन्निमित्तत्वात्' इत्यन्विताभिधानेन कथितोऽस्यार्थः - अर्थापत्तिर्नास्तीति Bṛha. 392.15 (*on* i.1.25);अनन्वितपदार्थदर्शने तत्स्मरणानुपपत्तिः; स्मर्यते च। अतः सिद्धमन्विताभिधानम् Bṛha. 395.8 (*on* i.1.25); वाक्यार्थत्वेन अन्विताभिधानेन विषयविषयिभावेन च तस्य विध्यर्थनिष्पादकत्वात्; उभयपरत्वे च भावार्थस्यैकस्मिन् पदग्रामे वाक्यार्थद्वयप्रसङ्गात् TātpaṬ. (U.) 106.21 (*on* 2.229); माता न मे वन्ध्येति, उद्दिश्य हि मातरं न वन्ध्यात्वं विधातुं शक्यते, तस्या अन्वयायोग्यत्वेनान्विताभिधानस्यासंभवात् PrakaPañ. 221.10; अध्याहारे ... पदार्थाकाङ्क्षायां तदुपकारोपस्थापितैः पदार्थैरन्विताभिधानम् PrakaPañ. 254.16; नान्विताभिधानं शक्तितोऽवस्थितम् BrahmSūBh. (Bhā.) 14.28 (*on* i.1.4); अन्विताभिधानं च पदानामभ्युपेयते NyāyMañ. i.297.16; पुमांसं रुणद्धि यद्धन्यात्तेनेति, तदप्यनुपपन्नम् अन्विताभिधानेन विधिविभक्तेर्हन्तिनावरुद्धत्वात् NyāyMañ. i. 323.18; यदि वाक्यस्य वाक्यार्थे व्युत्पत्तिः तदन्विताभिधानम् NyāyMañ. i.364.26; i.369.6; i.369.10; पुंसोऽधिकारतां प्रतिपादयंस्तद्विशेषणद्वारेणान्वयं प्रतिपद्यत इत्युपपन्नमन्विताभिधानम् ManuBh. i. 465.1 (*on* 5.89); पदान्तरस्य ...। श्रुतान्विताभिधाने तु व्यक्तमन्योऽन्यसंश्रयम् TattvBi. 93.4; 93.8; 123.4; 154.10; अन्विताभिधाने त्वभिधेयसाहचर्यमेवास्यास्ति संबन्धान्तरमिति युज्यते स्मारकत्वं पदानाम्। अथान्विताभिधानेऽप्यन्वितप्रत्यायनाय किमस्ति संबन्धान्तरं पदानाम् TattvBi. 160.15; योग्यता हि निबन्धनमन्विताभिधाने Kāśi. i.67.6 (*on* 2.21); मुख्यार्थस्यैव हि वाक्येऽन्विताभिधानमिष्यते NayaVi. 47.6 (*on* i.1.2); 48.1 (*on* i.1.2); तत्त्वतो हि स्मृतिस्थवर्णेभ्योऽर्थधीः, अन्विताभिधानस्य न्यायसंपादनाधीनतया विलम्बात् NayaVi. 181.3 (*on* i.1.5); 268.2 (*on* i.1.25); 272.3 (*on* i.1.25); परविशेषणत्वादन्विताभिधानं हि ग्राहकग्रहणम् TantrRa. 54.12; अन्विताभिधानमपि तर्ह्यनुपपन्नं गौरवादेव स्वरूपमात्रमेव तु लाघवात्पदानामभिधेयं वरमाश्रितं तन्त्र NyāyRaMā. 78.24; 80.23; ततश्च सर्वत्रैव तथास्तु किमन्विताभिधानकल्पनया NyāyRaMā. 88.20; 135.1; यदि हि ... अन्वितमेवाभिधेयमिति चेन्न, ... स्वरूपं तावदभिधेयमिति नान्विताभिधानम् NyāyRa. 875.12 (*on* 7.104); पदभागयोः प्रकृतिप्रत्यययोरन्विताभिधानमिष्टम् NyāyRa. 946.7 (*on* 7.355); उपव्ययत इत्येकं पदमन्विताभिधानाय कर्तारमपेक्षमाणं संनिहितेन कर्त्रान्वीयत इति। तदयुक्तम् ŚāstrDī. 202.7 (*on* iii .1.11); न्यायसंपादनोत्तरकालं ह्यन्विताभिधानम् NyāyMa. 239.1; प्राभाकरास्तु लोकवेदसाधारणव्युत्पत्तिबलेनान्विताभिधानं प्रसाध्य ... प्रामाण्यमास्थिषत NyāyKuA. ii (1). 212.2; न चान्विताभिधानेऽपि तत्साधनत्वसिद्धिः NyāyKuA. ii (2).94.7; न चान्विताभिधाने प्रमाणमस्ति। अन्वितार्थप्रतीतेरन्यथाप्युपपत्तेः Kiraṇā. 332.5; अनन्वितोऽर्थोऽभिहितान्वये पदार्थान्तरमात्रेणान्वितस्तु अन्विताभिधाने अन्वितविशेषस्त्ववाच्य एवेत्युभयनयेऽप्यपदार्थ एव वाक्यार्थः Kāvyānu. (He.) 32.27; वृद्धव्यवहारे पदानामन्विताभिधाने सामर्थ्यावधारणात् वेदेऽपि मुख्यवृत्त्या पदानामन्विताभिधायित्वात् न कार्यमात्रपरः सर्वो वेदः PrakaVi. 74.12; यथासुखमिति पदमपरिपूर्णत्वादन्विताभिधानात् पदान्तरमपेक्षते SmṛtiCan. v. 350.10; शब्देनान्वयपर्यन्ताभिधानं ह्यन्विताभिधानम् ŚrutaPra. iB.89.23 (*on* i.1.1); अन्विताभिधानस्य व्युत्पत्तावुपलक्षणम् VedāntKa. 339.21; वाक्यं तावदन्विताभिधानेऽप्यभिहितान्वयेऽपि सविशेषपरमेवेति तत्र तत्र क्रियासमभिहारेण साधितम् ŚatDū. 243.1; एवं च फलपरं स्वर्गकामपदं साधनवचनेनान्विताभिधानमर्हति VivaPraSaṁ. 134.10; पदानामन्विताभिधाने शक्तिः NyāySu. (Ja.) 276B.2 (*on* ii.1.2); एवं प्रतिज्ञातं अन्विताभिधानम् उपपाद्य यदुक्तं अभिहितान्वयादिपक्षाणामयुक्तत्वं तद् अन्विताभिधानानङ्गीकारे बाधकप्रदर्शनमुखेनोपपादयति NyāySu. (Ja.) 520B.5 (*on* iii.2.15); न चान्विताभिधाने अन्योऽन्याश्रयणम् NyāyPari. 369.9; कारकार्थान्विते स्वार्थे क्रियापदस्य सङ्केतग्रहः। एतदन्विताभिधानं वेदान्तिनाम् SarvaDaKau. 69.16; 'द्वारम्' इत्यादौ अध्याहारस्थले बुद्धिस्थेनैव संवरणादिनान्विताभिधानम् TantrRaha. 13.29; 29.25; अभिहितान्वयवादे माभूदनुपपत्तिः, अन्विताभिधाने तु भवति AdvaiSi. 702.10; 'पटो भवती'त्यनुषङ्गाध्याहाराभ्यां तात्पर्यान्विताभिधानयोरुपपन्नत्वेन रक्ताकाङ्क्षोत्थापनस्य रक्तादिपदत्रयविषयैकप्रयोजनकत्वज्ञानेनैव निर्वाह्यत्वात् ŚivārkaMaDī. i.56.1 (*on* i.1.1); विशेषणमर्यादालभ्यस्य च धर्मस्य किंचिद्व्यङ्ग्यतास्पर्शः सन्नपि न स काव्यमार्गे गण्यते। असुन्दरत्वात्। अन्विताभिधाने अतिविशेषवपुष इव सामान्यरूपाणां पदार्थानामन्वये RasGaṅ. 552.7; अन्विताभिधानादेवोपपदार्थकारकविशिष्टधात्वर्थप्रतीतिसंभवेन विरुद्धत्रिकद्वयाप्रसङ्गात् MayūMāli. 95.29 (*on* ii.1.1); अन्विताभिधानलक्षणग्राहकग्रहणेनाग्नीनां सामान्यतः पवमानहविःसाध्यत्वसिद्धौ किंरूपं तदिति विशेषापेक्षायामतिदेशबलेन साक्षात्संबन्धरूपं तदित्याश्रयितुं शक्यते MayūMāli. 205.1 (*on* iii.1.12); अतोऽव्ययस्थलेऽन्विताभिधानम्, न तु तुल्यादिपदानामपि AlaṅkāKau. (Vi.) 50.3; न च निपातस्थल एवान्विताभिधानम् इति वाच्यम् AlaṅkāKau. (Vi.) 51.8.

**अन्विताभिधानतस्** (anvitābhidhāna-tas) *adv.* on account of reference to semantically related (meanings) धीस्थत्वेनोपपदार्थकारकान्वयायोग्यतया अन्विताभिधानतो विशिष्टप्रतीत्यसंभवेन धात्वर्थोद्देशेनोपपदार्थस्य ... विरुद्धत्रिकद्वयापत्तिसंभवात् MayūMāli. 96.5 (*on* ii.1.1)

**अन्विताभिधानदर्शन** (anvitābhidhāna-darśana) *n.* observation of reference to semantically related (meanings) सन्निधिः ... बुद्धिविपरिवृत्तिः। सा च न शब्दनिबन्धनैव केवलमन्विताभिधानव्युत्पत्तावुपलक्षणम्, अध्याहृतेनापि लोके अन्विताभिधानदर्शनात् PrakaPañ. 389.8; TantRaha. 31.6.

**अन्विताभिधानदशा** (anvitābhidhāna-daśā) *f.* [Loc.] at the time of reference to semantically related (meanings) अन्विताभिधानदशायां प्रतिपन्न एवार्थस्सम्यगर्थः ŚrutaPra. iB.98.17 (*on* i.1.1); अन्विताभिधानदशायां यागविषयकं कार्यमित्यनुभवः ... घटादिकं योग्यतावशाद् यागविषयकापूर्वे पर्यवस्यति TattvCin. iv(2).344.1; अन्विताभिधानदशायान्त्वयोग्यतया तस्याप्रवेशः विधिप्रत्ययस्य च तत्राप्रयोगः केवलस्य तस्यासाधुत्वात् TattvCin. iv(2). 352.2.

**अन्विताभिधानदृश्** (anvitābhidhāna-dṛś) *f.* view of reference to semantically related (meanings) ततश्च मुख्यभूतात् महारसात् ... अन्विताभिधानदृशीवोपायात्मकानि सत्यानि वा ... रसान्तराणि भागाभिनिवेशदृष्टानि रूप्यन्ते AbhinBhā. i.267.10 (*on* 6.15)

**अन्विताभिधाननय** (anvitābhidhāna-naya) *m.* rule or law of reference to semantically related (meanings) सामाजिकानां झडित्येवान्विताभिधाननयेन मुख्यरसव्याप्तिरुदयते AbhinBhā. ii.130.15 (*on* 12.3); व्यतिषक्तानां पदार्थानां तथाभूतत्वादित्यन्विताभिधाननये 'वाक्यार्थो न पदार्थः' Kāvyānu. (He.) 32.24.

**अन्विताभिधाननियम** (anvitābhidhāna-niyama) *m.* rule or law of reference to semantically related (meanings) रक्तपदस्य केनचित्पदेनान्विताभिधाननियमेऽपि ... अनुषङ्गाध्याहाराभ्याम् ... रक्तादिपदत्रयविषयैकप्रयोजकत्वजनकत्वज्ञानेनैव निर्वाह्यत्वात् ŚivārkaMaDī. i.55.33 (*on* i.1.1)

**अन्विताभिधाननियामक** (anvitābhidhāna-niyāmaka) *adj.* which governs the reference to semantically related (meanings) त्वयान्विताभिधाननियामकत्वं यस्य वक्तव्यम्, तस्यैव मया षष्ठीप्रयोगनियामकताया वाच्यत्वात् AlaṅkāKau. (Vi.) 51.8.

**अन्विताभिधानपक्ष** (anvitābhidhāna-pakṣa) *m.* (Prābhākaras') view of reference to the semantically related (meanings) नन्वन्विताभिधानपक्षे व्युत्पत्तावुपलक्षणाश्रयणमेव गौरवम् PrakaPañ. 391.14; अन्विताभिधानपक्षे च कथमङ्गुल्यग्रवाक्येऽपि नान्वयस्यात् शाब्दोऽस्त्येव समन्वयः NyāyMañ. i.370.5; ननु किमयमन्विताभिधानपक्षः पुनरुत्थापयितुमिष्टः NyāyMañ. i.371.12; अन्विताभिधान-